No. ४७५८

Title कामेश्वरतंत्रे यंत्र संस्कार पद्धतिः

Author ×

Extent ३ पत्राणि Age ×

Subject तंत्रम्

यंत्रसंस्कारपद्धतिः कामेश्वरतंत्रे

४७ ५८

यन्त्रसंस्कारपद्धतिः कामेश्वरतन्त्रे
४८५८

त्रप्रतिष्ठा

१

प्रकारान्तरं

वामके

॥श्रीगणेशायनमः॥ अथयंत्रसंस्कारः॥ कौमेश्वरतंत्रे॥ भैरव्युवाच॥ चक्रभेदंमहादे
वत्वत्प्रसादान्मयाश्रुतं॥ इदानींश्रोतुमिच्छामिप्रतिष्ठाकर्मनिर्णयं॥ श्रीशंकरउवाच॥ शृणुदेविमहाभागे
जगत्कारिणिकौलिनि॥ तस्योद्यापनकर्मांगंसर्वत्रैवविनिर्णयं॥ स्नात्वासंकल्पयेन्मंत्रीगुरोरर्चनमाचरेत्॥ रभे
पंचगव्यंततःकृत्वाशिवमंत्रेणमंत्रितं॥ तत्रचक्रंक्षिपेन्मंत्रीप्रणवेनसमाकुलं॥ उद्धृत्यचततश्चक्रंस्थापये स्ना
त्स्वर्णपात्रके॥ पंचामृतेनदुग्धेनशीतलेनजलेनच॥ चंदनेनसुगंधेनकस्तूरीकुंकुमेनच॥ पयोदधिघृ
तक्षौद्रशर्कराद्यैरनुक्रमात्॥ ततोधूपांतरैःकुर्यात्संचामृतविधिंबुधः॥ हाटकैःकलशैर्दिवीमष्टभिर्वा
रिपूरितैः॥ काषायजलसंपन्नैःकारयेत्स्नानमुत्तमं॥ ततस्तीर्थजलेनैवमूलेनप्रणवेनच॥ स्ना राम
नंसमाप्यतंदेविस्थापयेत्स्वर्णपीठके॥ यंत्रराजायविद्महेमहायंत्रायधीमहि॥ तन्नोयंत्रःप्रचोदयात्॥ १

य=२

स्पृष्ट्वा यंत्रं कुशाग्रेण गायत्र्या चाभिमंत्रयेत्॥ अष्टोत्तरशतं देवि देवताभावसिद्धये॥ आत्मशुद्धिं ततः कृ
त्वा षडंगैर्देवतां यजेत्॥ तत्रावाह्य महादेवीं जीवन्यासं चकारयेत्॥ उपचारैः षोडशभिर्महामुद्रादिभिः
सदा॥ फलतांबूलनैवेद्यैर्देवीं तत्र समर्चयेत्॥ पट्टसूत्रादिकं दद्यात् वस्त्रालंकारमेव च॥ मुकुरं चामरं घं
टां यथायोग्यं महेश्वरि॥ सर्वमेतत्प्रयत्नेन दद्याद् आत्महितेरतः॥ ततो जपेत्सहस्रं च सकलेप्सितसि
द्धये॥ बलिदानं ततः कुर्यात् गणमेव च राजकं॥ अष्टोत्तरशतं हुत्वा संपाताज्यं विनिःक्षिपेत्॥ अष्टो
त्तरशतं होममाज्यधान्यैस्तिलेन च॥ मूलमंत्रं समुच्चार्य मंत्री मंत्रांगमाचरेत्॥ होमकर्मण्यशक्त
श्चेद्द्विगुणं जपमाचरेत्॥ धेनुमेकां समानीय स्वर्णशृंगां घलंकृतां॥ गुरवे दक्षिणां दद्यात् ततो देव्या
विसर्ज्जनं॥ अथात्र प्रयोगः॥ ॥कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्॥ ॐ अद्ये

स्वरा॥

स्यादिअमुकगोत्रंश्रीअमुकदेवशर्माअमुकदेवतायाःपूजार्थंअमुकयंत्रसंस्कारमहंकरिष्ये॥इति
संकल्प्य॥पंचगव्यमानीयहोमितिमंत्रेणाष्टोत्तरशतमभिमंत्र्य॥प्रणवेनयंत्रंतत्रनिःक्षिपेत्॥ततः
उत्तोल्यपात्रेस्थापयेत्॥ततःशीतलचंदनगंधकस्तूरीकुंकुमैःस्नापयित्वा॥पंचामृतमानीय॥होंइ
तिमंत्रेणपूर्ववत्शोधयित्वास्नापयेत्॥तत्रक्रमः॥प्रथमंक्षीरेणस्नापयित्वा॥पुनर्जलेनस्नापयि
त्वा॥धूपंदद्यात्॥एवंदध्याघृतेनमधुनाशर्करयाच॥ततोष्टभिःकलशैःकुंकुमगोरोचनाचंदन
मिश्रितैस्तोयैःस्नापयेत्॥सर्वत्रस्नानंतुमूलमंत्रेण॥ततोयंत्रमुत्तोल्यकुशाग्रेणयंत्रंस्पृष्ट्वा॥यंत्ररा
जायविद्महेमहायंत्रायधीमहि॥तन्नोयंत्रप्रचोदयात्॥इतिअष्टोत्तरशतमभिमंत्र्य॥प्राणप्रतिष्ठांकुर्या राम
त्॥अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः॥ऋग्यजुःसामानिछंदांसिचैतन्यदेवताप्राण २

प्रतिष्ठायांविनियोगः॥ तद्यथा॥ आंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवतायाः प्राणाइहप्राणाः॥ ए
वं आंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवतायाः जीवइहस्थितः॥ एवं आंह्रींक्रोंयंरंलंवंशंषंसंहंहौं
हंसः अमुकदेवतायाः सर्वेन्द्रियाणिइहस्थितानि॥ एवं आंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसः अमुकदेवता
याः वाङ्मनश्चक्षुश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ इति प्राणान्प्रतिष्ठाप्य॥ तत्रस्थित
देवतामावाह्यषोडशोपचारैरादिनासंपूज्य॥ पंचोपचारैर्वापूजयेत्॥ ततः पद्यस्रजादिकंदत्वा॥ अष्टोत्तर
सहस्रंशतंवाजपेत्॥ शक्तश्चेद्बलिंदद्यात्॥ ततः अष्टोत्तरशतहोमंकृत्वा प्रस्याहुतिसंपातंदद्यात्॥ हो
मासामर्थ्ये द्विगुणजपः कार्यः॥ ततोदक्षिणांदद्यात्॥ अच्छिद्रावधारणंकुर्यात्॥ इतियंत्रसंस्कारप राम
द्धतिः॥ ॥श्रीराम॥

गुरवे सुवर्णालङ्कृतां गां दक्षिणाञ्च दत्वा

~~[illegible]~~ ईश्वर तन्त्रानुसारेण ३
बामके

ॐ श्री १ [illegible] संवत्सरा ११